
# ಶ್ರೀಮದಾನನ್ದತೀರ್ಥಭಗವತ್ಪಾದಾಚಾರ್ಯಃ



Tracking:

| Sr | Date | Remarks | By |
|---|---|---|---|
| 1 | 02/03/2012 | **Typing Started on** | **H K Srinivasa Rao** |
| 2 | 02/03/2012 | **Typing Ended on** | **H K Srinivasa Rao** |
| 3 | | **I Proof Reading & Correction** | **M S Venugopal & H K Srinivasa Rao** |
| 4 | 14/08/2012 | **II Proof Reading & Correction** | **B S Pavan & H K Srinivasa Rao** |
| 5 | 28/08/2013 | **Published** | **H K Srinivasa Rao** |

## ॥ ಶ್ರೀ ಹಯವದನ ರಂಗವಿಠ್ಠಲ ಗೋಪೀನಾಥೋ ವಿಜಯತೇ॥

*Blessed by Lord and with His divine grace, we are pleased to publish this Magnanimous Work of sri Acharya Madhwa. It is a humble effort to make available this Great work to sadhakas who are interested in the noble path of propagating Acharya Madhwa's Philosophy.*

*With great humility, we solicit the readers to bring to our notice any inadvertant typographical mistakes that could have crept in, despite great care. We would be pleased to incorporate such corrections in the next versions. Users can contact us, for editable version, to facilitate any value additions.*

*Contact: H K SRINIVASA RAO, N0 26, 2ND FLOOR, 15TH CROSS, NEAR VIDHYAPEETA CIRCLE, ASHOKANAGAR, BANGALORE 560050. PH NO. 26615951, 9901971176, 8095551774, skype Id: SRKARC6070*

*Email :* **srkarc@gmail.com**

## ಕೃತಜ್ಞತೆಗಳು



ಜನ್ಮಾಂತರದ ಸುಕೃತದ ಫಲವಾಗಿ ಮಧ್ವಮತದಲ್ಲಿ ಜನಿಸಲು, ಪ್ರೇಮಮೂರ್ತಿಗಳಾಗಿ ನನ್ನ ಅಸ್ತಿತ್ವಕ್ಕೆ ಕಾರಣರಾದ, ಈ ಸಾಧನೆಗೆ ಅವಕಾಶಮಾಡಿದ, ನನ್ನ ಪೂಜ್ಯ ಮಾತಾ ಪಿತೃಗಳಾದ, ದಿವಂಗತರಾದ ಲಲಿತಮ್ಮ ಮತ್ತು ಕೃಷ್ಣರಾವ್ ಹೆಚ್ ಆರ್ ಅವರ ಸವಿ ನೆನಪಿನಲ್ಲಿ ಈ "ಸರ್ವಮೂಲ ಯಜ್ಞ"

"ಮಾತೃದೇವೋ ಭವ-ಪಿತೃದೇವೋಭವ-ಆಚಾರ್ಯದೇವೋಭವ"

ಗ್ರಂಥ ಋಣ:ಆಚಾರ್ಯ ಪ್ರಭಞ್ಜನರಿಂದ ಪ್ರಕಾಶಿತವಾದ ಸರ್ವಮೂಲ ಗ್ರಂಥಗಳು

# ॥ मायावादखण्डनम् ॥

नरसिंहोऽखिलज्ञानमतध्वान्तदिवाकरः।

जयत्यमितसज्ज्ञानसुखशक्तिपयोनिधिः ॥

विमतमनारम्भणीयम्, अन्यथाप्रतिपादकत्वात्, यदित्थं तत् तथा, यथा सम्प्रतिपन्नम्।

न हि ब्रह्मात्मैक्यस्य यथार्थ्यं तत्पक्षे। अद्वैतहानेः स्वरूपातिरेके। अनतिरेके स्वप्रकाशत्वादात्मनः सिद्धसाधनता।

निर्विशेषत्वादात्मनो नानधिगतो विशेषः। सिद्धत्वात् स्वरूपस्य विशेषाभावाच्च नाज्ञानं कस्यचिदावरकम्। अनधिगतार्थगन्तृप्रमाणमिति च तन्मतम्।

अज्ञाना सम्भवादेव तन्मतमखिलमपाकृतम्।

मिथ्यात्वे चैक्यस्यातत्त्वावेदकत्वमागमस्य स्यात्। सत्यता च भेदस्य।

एवमेव प्रयोजनमपि निरस्तम्। स्वरूपत्वान्मोक्षस्य पूर्वमेव सिद्धत्वात्। अज्ञानसम्भवेन चतुर्थप्रकाराभावात् पञ्चमप्रकारताऽपि निरस्ता। विषयप्रयोजनाभावादेवाधिकारी च। तदभावदेव सम्बन्धोऽपि ॥

'द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।

क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।

यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥

यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः ।

अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥

यो मामेवमसम्मूढो जानाति पुरुषोत्तमम् ।

स सर्वविद्भजति मां सर्वभावेन भारत ॥

इति गुह्यतमं शास्त्रमिदमुक्तं मयाऽनघ ।

एतद्बुध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारत ' ॥

' इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः ।

मनसस्तु परा बुद्धिर्बुद्धेरात्म महान् परः ॥

महतः परमव्यक्तमव्यक्तात् पुरुषः परः ।

पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः ' ॥

'भूम्नः क्रतुवज्ज्यायस्त्वं तथा च दर्शयति' ।

**इति विष्णोः पुरुषोत्तमत्वमेव सर्वशास्त्रार्थत्वेन भगवता श्रुत्या चाभिहितम् ॥**

इति सर्वज्ञमुनिना मायावादतमोऽखिलम्।

निरस्तं तत्त्ववादेन सतां संशयनुत्तये ॥

नास्ति नारायणसमं न भूतं न भविष्यति।

एतेन सत्यवाक्येन सर्वार्थान् साधयाम्यहम् ॥

**॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्य विरचितं मायावादखण्डनम्॥**

**॥ श्री कृष्णार्पणमस्तु ॥**

**॥ मुख्यप्राणवशे सर्वं स विष्णोर्वशगः सदा ॥**

**॥ प्रीणयामो वासुदेवं देवतामण्डलाखण्डमण्डानम् ॥**